International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 162-164
© 2017 IJSR
www.anantaajournal.com
Received: 20-11-2016
Accepted: 24-12-2016

डा0 गौतम शरण त्रिपाठी
खजुहान, टरवॉ पारसा, रसूलपुर, एकमा, सरण, बिहार, भारत

Corresponding Author:
डा0 गौतम शरण त्रिपाठी
खजुहान, टरवॉ पारसा, रसूलपुर, एकमा, सरण, बिहार, भारत

# पाञ्चभौतिकशरीरविवेचनम्

डा0 गौतम शरण त्रिपाठी

**प्रस्तावना**

आत्मा ईश्वरीयांशः पार्थिवशरीरश्च। शरीरस्य साधनं पञ्चमहाभूतमपि आत्मनोत्पन्नं विद्यते। आत्मनः चतुर्थांशेन पृथ्वीजलाग्निवायु आकाशश्चेत्यादीनां पञ्चमहाभूतानां जन्म अभवत् येन शरीरं निर्मितं भवति।

''क्षितिर्वारि हविर्भोक्तां वायुराकाश एव च।
स्थूलभूता इमे प्रोक्ता पिण्डोऽयं पञ्चभौतिकः''।। [1]

अस्य पाञ्चभौतिकशरीरे एषां तत्त्वानां किमस्थानमस्ति, तेषां विवेचनमेतादृशम्–

त्यागास्थिमांस रोमाणिमांस चैव खगेश्वरः।
एते पञ्चगुणा भूमेर्मयाते प्रकृर्तिताः।।
ललामूत्रं तथा शुक्रं मज्जा रक्तं च पञ्चमम्।
अपोपञ्चगुणाः प्राक्तास्तेजसौऽपि निशामयः।।
क्षुधातृषा तथालस्यं निद्राकान्तिस्तथैव च।
तेज पञ्च गुणं तार्क्ष्यं प्रोक्तं सर्वत्र योगिभिः।।
आकुञ्चनम् धावनं च लंघनं च प्रसारणम्।
चेष्टितं चेति पञ्चैव गुणावायोः प्रकीर्तिताः।।
घोशश्चिन्ता च शून्यत्वं मोहश्चिन्ता च संशयः।
आकाशस्य गुणा पंच ज्ञातव्यास्ते प्रयत्नतः।। [2]
त्वचाऽस्थिमांस रोमाणि एते पञ्चगुणा पृथ्वी तत्वस्य सन्ति। लालामूत्रशुक्रमज्जा रक्तश्चैते गुणाः जलतत्त्वस्य सन्ति।
क्षुधातृषां आलस्य निद्राकान्तिश्चैते पंचगुणाः अग्नितत्वस्य सन्ति।
संकुचन धावनलंघनविस्तारचेष्टाश्चैते गुणाः वायुगुणस्येति।
शब्द चिन्ताशून्यत्वमोहसंश्यचैते गुणाः आकाशतत्वस्येति।। [3]

एषां संयोगवशादेव शरीरनिर्माणं भवति। एतादातिरिक्तं आत्मानां प्रारंभे मनसः तथा अहंकारस्य पृथक् सृष्टिः कृताः। एवं पञ्चमहाभूतं मनः, अहंकारः एव आत्मनो संयोगवशात् जीवनस्य सृष्टिर्भवति। आत्मा अमरः, शरीरनाशवान्, अतो पंचतत्वेन निर्मिताऽनात्मारूपशरीरस्य नष्टे सति आत्मशरीरयोः सम्बन्धविच्छेदः भवति। आत्मा नवीनशरीरे प्रविशति। इदमेव जीवनस्य दार्शनिक विवेचनं विद्यते। एवं ज्ञाते सति दैहिक जीवनस्य सौरमण्डलस्य सम्बन्धः स्थापित कथं भवति।
तस्य विवेचनमुपस्थाप्यते–अग्नितत्वेन–भौमस्य, पृथ्वीतत्वेन–बुधस्य, आकाशतत्वेन–

वृहस्पतेः, जलतत्वेन–शुक्रस्य एवं वायुतत्वेन– शनेरूत्पतिर्जाता।
मनः–चन्द्रमा, आकाशः–वृहस्पतिः, वायुः–शनिः, अग्निः–भौमः, जलम्–शुक्रः, पृथ्वी च बुधः। मानसः खं ततोवायुः अग्निरापो धरोक्रमात्।
गुणैकः वृद्धया पंचैवं महाभूतानि यज्ञिरे।।
तेजोभूखाम्बुवातेभ्यः क्रमशः पंच यजिरे।

अतो, आत्मनः सूचकः–सूर्य। मनसः सूचकः चन्द्रमा। अग्ने सूचकः– भौमः। पृथिव्याः सूचकः–बुधः। आकाशस्य सूचकः–वृहस्पतिः। जलस्य सूचकः–शुक्रः। वायोः सूचकः– शनि। एवं अहंकारस्य सूचकः–प्रकृतिः।

यथा आत्माऽहंकारमनसाभिः पंचमहाभूतैरपि शरीरस्य जीवनस्य सृष्टिर्भवति तथैव एभिर्तत्त्वैः सौरमण्डलस्यापि निर्माणं भवति। कारणादस्मात् पाञ्चभौतिकशरीरस्य सौरमण्डलेन सह सम्बन्धस्तिष्ठति।
अवश्यमेव सौरमण्डलस्य पंचमहाभूतैः एव पृथिव्याः तुच्छमहाभूतानामस्तित्वं विद्यमानं विद्यते। यावतः शरीरे आत्मा प्रविशति अर्थात् गर्भति युवावस्था पर्यन्तं शरीरस्य विकासः वा शरीरे स्थितानां पंचमहाभूतानां विकासः सौरमण्डलीय महाभूतानामुपर्येवाधारितः विद्यते।
पंचमहाभूतानामऽपि मरस्परमविच्छिन्नं सम्बन्धस्तिष्ठति। काश्चिदपि महाभूतस्य अंशस्याविद्यमाने सति शरीर निर्माणं न भवितुर्महति। अतो सर्वेषां महाभूतानामस्तित्वं निश्चितपरिमाणेअवश्यकं भवति।
यदि कोऽपि महाभूतः शरीरे आवश्यकपरिमाणादधिकं भवति तदा शरीरे विकृतिसञ्जाता यतः सविच्छन्सम्बन्ध सत्वेऽपि गुणाधिक्येन विरोधं जनयति। उदाहरणार्थ अग्नितत्वः जलतवश्च परस्परं विरोधी विद्यते। शरीरस्य विकासार्थ एक निश्चितपरिमाणं परमावश्यकंभवति।
किन्त्वत्रैव यदि कोऽपि तत्वः मित्रता वृद्धिं प्राप्नोति तदा शरीरे महाभूतानां युद्धं प्रारभ्यते एवं प्रकारेण यदि कोऽपि तत्वः न्यून्त्वं तिष्ठति तदा शरीरस्य विकासोऽवरूद्धो भवति। उदाहरणार्थ– जलस्य यद्गुणं दर्शनशास्त्रेषु कथित तदनुसारेण यदि अस्मिन् तत्वेन वृद्धिर्भवति तदा लालकफमूत्रादिषु वृद्धिर्भविष्यति। यदि तत्वेऽस्मिन् न्यून्त्व जातं तदा शुक्रमज्जारक्तानां विकासः अवरूदधो भविष्यति। अनेन विचारेण इदमेव तथ्यं पुरतः समागच्छति यत् पंचमहाभूतानां वृद्धिह्रासयोः कारणवशादेव शरीरे विकृतिः रोगश्चोत्पन्न भवति।
सौरमण्डलस्य महाभूतेषु कथं विकृतिर्भवतीति विषये यदा द्वौ विरोधिनौ तत्वौ एकस्मिन् समसूत्रे सभागतौ भवेता तदा विकृतिरवश्यमेव भवति। एतल्लक्षणं ज्योतिषशास्त्रान्तरे यथा–

एकराशिगतावेतौ धरापुत्रांगिरा सुतः।
तदा मेघा न वर्षन्ति वर्षाकाले न संशयः।। [4]

यदावृहस्पतिभौमौ एकसमसूत्रे समागतौ तदावरषाकालेऽपि वर्षा न भवति यतः भौमः अग्नितत्वसूचकः वृहस्पतिश्चाकाशः तत्वः सूचकः। समसूत्रे सति अग्ने वृद्धौ सति वर्षा न भवति। एव प्रकारेण विवेचनम् विज्ञानसम्मतं विद्यते।
अनेनैव यदा वृहस्पतिः शुक्रश्च समसूत्रे समागच्छति तदा प्रचुरावृष्टि र्भवति। वृहस्पतिः आकाशतत्वसूचक शुक्रश्च जलतत्वस्य सूचकः अनयोर्द्वयो समागते आकाशे जलस्य बृद्धिर्भवति, फलतः वृष्टि सूचकः भवति। ग्रहाणा समसूत्रे समागतस्यातिरिक्तमप्यनेकानि कारणानि सन्ति। सौरमण्डलीय महाभूतानामुपरि अपि व्याप्तानामसंख्यताराणामऽपि प्रभावः भवति। स्वकीय भ्रमणकाले ग्रहाः येषां तत्वानां मध्यस्थाः सन भ्रमन्ति तदनुसारेण ऐषु विकृतिर्भवति। कारणातदस्मात् ज्योतिषशास्त्रस्य महर्षिभिः ब्रह्माण्डं द्वादशराशीषु एव लग्नादिद्वादशभावेषु विभक्तिकृतिमिति। अनेन ज्ञातं भवति यत् ब्राह्माण्डे कस्मिन स्थाने कस्य तत्वस्य पिण्ड विद्यमानोऽस्ति। उदाहरणार्थ– ज्योतिषशास्त्रे मकरराशिः भौमस्योच्चराशिः मन्यते। अस्मिन् मकरराशौ भौमः (अग्नितत्वं) बलवान् भवति एवं कर्क राशौ अस्मिन् तत्वस्य निर्बलं भविष्यति। विज्ञज्ञनवेत्तारः मकरराशि पिण्डान् वायुतत्वं मन्यन्ते। अनेनैव कर्क राशि तत्वं जलपिण्डमिति। वायुरग्न्योः सानिध्यं अग्निप्रज्वलिते सहायकं सिद्धं भवति। अग्निजलयोः सानिध्यं अग्नितत्वे ह्रासकारकत्वं विद्यते। एवमेव होराशास्त्रे फलादेशविधौ विवेचनम् प्रदृश्यते। सूर्यं विना जीवनमसंभवमिति कथम्? स्पष्टः एव सूर्यः आत्मपरिचायकः आत्मनं विना जीवनं निरर्थकं भवति। चराचरप्राणीनां सूर्यस्य प्रकाशः आवश्यकः यत्प्रकाशकत्वादेव अन्नमुत्पन्नम् भवति।

''कलावन्नगताः प्राणाः'' इति पुराण वचनात्।
''अन्नं ज गतः प्राणाः'' इति वराहवचनात् च।

''अन्नाद्भवन्ति भूतानि पर्यन्यादन्नसंभवः'' इति भगवतः श्री कृष्णवचनस्य मूले च सूर्यस्य प्राधान्यं सूचितं भवति। ज्योतिषशास्त्रे तुलाराशि सूर्यः निर्बलः मन्यते। उक्त काले आत्मतत्वं निर्बलं भविष्यतीति ज्योतिषशास्त्रेऽपि कथितम्। यथा–

तुलायां दशमे भागे स्थितिकमलवोधनम्।।
स्हस्र राजयोगानां नाशयत्याशु जन्मनि।। [5]

यस्य जातकस्य जन्मकाले तुलाराश्ङ्गि स्थिते दशमांशोपरि सूर्यः भवेत्तदा सहस्र राजयोगं सत्वेऽपि शिघ्रमेव राजयोग नष्टं भवति। आत्मतत्वानिर्बल त्वदेवं सम्भवति, चेतनत्वे सत्यऽपि शरीरे निर्बलत्वं गच्छतीति। एवं ''सरवभौमस्रू पुत्रोऽपि नीचत्वमधिगच्छति'' वचनं सार्थकत्वं सिद्धयति।
मानवशरीरे तेषां तत्वानां बृद्धिर्भविष्यति येषां तत्वानां परिचायकाः ग्रहाऽनुकूला भविष्यन्ति। यथा पृथ्वी तत्वस्य परिचायकः बुधः अनुनुकूले सति। त्वचाऽस्थिमांसरोमादिषुवृद्धिना सांसालः भविष्यति। एवं यस्य तत्वस्य परिचायकः यह अनुकूलः न भवति।
कारणत्वात् शरीरे रोगोत्पत्तिः भवति। शनिः वायुपरिचायकः ग्रहोऽस्ति। अस्य ग्रहस्याननुकूले सति, शरिरीकाऽवयावाः मानसिक चेष्टाया अनुसरणं न कुवन्ति, हस्तपादयोः संकुचनं विस्तारसञ्च अनुकूल न स्यादिति अवस्थायां पक्षाघातः (लकवा) भवति। ज्योतिष शास्त्रस्य कथनं सार्थकं संगच्छते। यथा–''चतुर्थे शनौवातरोगी।'' इत्यनेन चिकित्साकाः अपि एतादृशं जातकं वातारोगीति घोषयन्ति।
अनेन प्रकारेण समाजिक परिवारिकार्थिकानां सर्वेषु क्षेत्रेषु प्रभावं जनयति। भौमः– अग्नितत्व–सूचकः अग्निगुणेष्वेकं गुणं शारिरीक–कान्तित्येरपि विद्यते। एतस्य गुणस्या नुकूल सति वितितं प्रभावशालित्नं न भवति। परिवारिकक्षेत्रे आकाशीयगुणेषुं संशयोऽपि एकः गुणः विद्यते। यदि वृहस्पतेर्गुणं अनुकूलं न भवति तदा मानवस्य प्रकृतिः संशयात्मिका भवति। परिणामतः अवनतिः दुखञ्च जायते। कथनाभिप्रायः यत् ज्योतिषशास्त्रस्य प्रत्येक सिद्धान्तं विज्ञानसम्तमिति। ज्योतिषशास्त्रस्य दैहिकपरमार्थिकं जीवानाभ्यां सह चिरन्तनं सम्बन्ध–मनुतिष्ठति। जीवने ज्योतिषशास्त्रस्य प्रयोजनमेवानुद्दिश्यप्योगित्वं सिद्धयति। अस्माकं पूर्वकालीनः युगः वाश्वास्रू आस्थायाश्चासी विदुषां महषिणां च कथनं जनसाधारणोऽपि ब्रह्मवाक्यमिव मान्यते स्म। समप्रतिकः युगः विज्ञानस्य (ज्ञान विपरीतस्य) विद्यते पत्र प्रत्येकस्मिन् विषयोपरितर्क क्रियते ''यत्तर्कणानुसन्धतेसधर्मवेदनेत्तरः ''तर्केन एव यस्य विषयस्य प्रतिपादनं भवति। सर्वधर्मः, सैवकर्मः, सैवसत्य च सैवाचरणं शेषे सर्वमिथ्या आउम्बर–श्चेति।
आधुनिके वैज्ञानिकयुगे ज्योतिश्ङ्ग शास्त्रस्य विज्ञज्ञनमुपर्याक्षेपाः भवन्ति, किन्तु ते सर्वे निर्मूला भवन्ति। गगनांचरणां ग्रहणां मानव जीवनोपरि कीदृश्ङ्गं प्रभावं भवतीति पूर्वमेव मयोक्तमिति। दैवज्ञ भाग्यनिरीक्ष्का वेवेति यथा–

साक्षात्मेवद्भ्ङ्गग्य भाग्यनिरीक्षणाय
सुनिर्मलादर्शतले किलेदम्।। [6]

जन्मकालस्य ग्रहस्थित्यानुसारेण एव स्माकं कर्म (पूर्वजन्मार्जित कर्मरूप गुणाः आकाशतत्वस्येति जलतत्वस्य अग्नि तत्वः सूचकः अनयोर्द्वयो समागते आकाशे जलस्य भाग्य) तथैवं स्पष्टं दृश्यते यथा दर्पणे सर्वं दृष्टिपथे समायाति। जनसाधारणाय इदमप्यावश्यकं विद्यते, यत् स्वकीय कर्ममाध्यमेन जीवनस्यरूपरेखां ज्ञानं तस्य हिते एव भवति। यत्र दैवज्ञस्य आवश्यकता समागच्छति।
कथितम् वराहेन–

न तथेच्छति भूपति पिता
जननी वा जनकेऽथवा सुहृता।। [7]

भग्यस्य निर्देशकत्वात् यथा सहायता मानवजीवने विज्ञानेन प्राप्ताम् भवति न तावत् सहाय्यं पित्रा, मात्रा च भात्रा भवति। जीवनस्यरूपरथस्य भाग्यपुरूषार्थो द्वौ चक्रौस्तः। एकं विनाऽपरं निरर्थकं भवति।
कथितमपि–

तथाह्यकेनचक्रेण न रथस्य गतिर्भवेत्
एवं पुरूषकारेण, विना दिवं न सिध्यति।। [8]

यथा एकचक्रेंन रथं गतिशीलं न भवति, तथैव केवलं भाग्यशात् जीवन गतिशीलं न भवति। भाग्यपुरूषार्थं नामकेन् पञ्चगुणा भूमेर्मयाते प्रकृर्त्तिताः चक्रद्वयेनैव जीवनरूपीशकटं चलिष्यति। जीवनेस्माकं भग्यस्य कदा भाग्योदयं भविष्यति कस्मिन समये अस्माभिः पुरूषार्थं करणीयमिति, केन कार्येण कस्यां दिशि सफलत्वं सिद्धयिष्यति कस्मिन समये सतर्कतामावश्यकं सर्वेज्ञानार्थं ज्योतिष शास्त्रं एवं जन्म पत्रपञ्चावश्यकं भवति।
यथा कथितम्–

श्री जन्मपत्री शुभदीपकेन व्यक्तभवेद्भ– विफलं समस्तम्।
क्षमाप्रदीपेन यथालयस्थ, घटादिजातं प्रकटीत्वमेती।। [9]

जन्मकुण्डली माध्यमेनमानव जीवनं तथैव प्रकाश्यते येन प्रकारेण तस्य सम्पूर्णजीवनं सुस्पष्टं भवति। रात्रौअन्धकारे यथा सर्वं पदार्थं दीपकस्य प्रकाशे संदृश्यते। अतो मानव जीवनस्य जन्मपत्रपरमावश्यकं भवति। अत्रापि ज्योतिषशास्त्रं निरीक्षक रूपेण तिष्ठति। अपि च–

''यस्य नास्ति खलु जन्म पत्रिका या शुभाशुभफलप्रदायिनी।
अन्धकं भवति तस्य जीवनं, दीपहीनं इव मन्दिरं निशि।।'' [10]

**निष्कर्ष**

जन्मपत्रिका या शुभाशुभ फलप्रदायिनी भवति। शुभाशुभ फलज्ञानं जन्मपत्र्यां एव भवति। एतादृशी जन्मपत्री यस्मिन संद्धौनास्ति। तस्य जीवनं प्रकाशहीन मन्दिरमिव अन्धकारमयं भवति। एव स्कन्धत्रयात्मकं ज्योतिष शास्त्रं अस्माकं जीवने कालविधानशास्त्रत्वात् सर्वास्मिन कर्माणि सहायकं सिद्धं भवति। अतीन्द्रियज्ञैः महर्षिभिः प्रणीतं प्रणीतं शास्त्र मिदं सर्वजनहिताय कल्ययाणाय चोपकारकं सिद्धं भवति। ''विनैतदाखिलं श्रौत स्मार्तं कर्मं न सिध्यति'' नारदवचनादिति। एव प्रकारेण ज्योतिषशास्त्रस्य माध्यमेन पाञ्चभौतिकशरीरे तत्वस्य परिचायकः विवेचनम् प्रदृश्यते मानव जीवनस्य उपयोगीताश्चपगेपगे आधुनिककाले समये सतर्कतामावश्यकं सर्वेज्ञानार्थं ज्योतिष शास्त्रस्य मार्गप्रशस्तं कुर्यात्। इति पाञ्चभौतिकशरीरस्य सौरमण्डलेन सह सम्बन्धस्तिष्ठति।

**सन्दर्भा**


1. गरूणपुराण संकलित्यो नवनीत पृष्ठ 16।
2. गरूणपुराण संकलित्यो नवनीत पृष्ठ 16।
3. ज्योतिष नवनीत पृष्ठ 19 कादम्बरीतः संग्रहीत वचनम्।
4. ज्योतिष नवनीत पृष्ठ 20।
5. ज्योतिष नवनीत संकलित्यो पृष्ठ 23।
6. ज्योतिष नवनीत पृष्ठ 24।
7. ज्योतिष नवनीत पृष्ठ 26।
8. मानसागरी अध्याय 1 श्लोक 21।
9. मानसागरी अध्याय 1 श्लोक 12।
10. ज्योतिष नवनीत पृष्ठ 31।